# Shri Jagannatha Ashtakam

# શ્રીજગન્નાથાષ્ટકમ્

## Document Information

Text title : Jagannatha Ashtakam 3

File name : jagannAthAShTakam3.itx

Category : aShTaka, vishhnu, jagannatha, viShNu, krishna

Location : doc_vishhnu

Author : Himanshu Gaud

Transliterated by : Prakash Ranganath

Proofread by : Prakash Ranganath

Latest update : May 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 24, 2026

*sanskritdocuments.org*

Shri Jagannatha Ashtakam

# શ્રીજગન્નાથાષ્ટકમ્

શિવપ્રાણરૂપં જગત્પ્રાણરૂપં
સુભૂપાધિભૂપં સદા શાન્તરૂપમ્ ।
અરૂપાનુરૂપોપકારપ્રરૂપં
સુરૂપં જગન્નાથમુદ્ભાવયામઃ ॥ ૧॥

અલક્ષ્યૈકલક્ષ્યાનુલક્ષ્યપ્રવિષ્ટં
સમીક્ષાનિરીક્ષાપરીક્ષાભ્યદૃષ્ટમ્ ।
વિવક્ષુપ્રવાક્ષુ પ્રવિષ્ટં વિશિષ્ટં
જગન્નાથમુદ્ભાવયામોઽર્ચયામઃ ॥ ૨॥

ક્વચિચ્છૈલશીલૈઃ ક્વચિત્પુષ્પશીલૈઃ
ક્વચિદ્ધૈર્યશીલૈઃ ક્વચિન્નૃત્યશીલૈઃ ।
ક્વચિત્તાપસૈર્ભક્તિશીલૈસ્સુવન્દ્યં
જગન્નાથસન્નાથમુદ્ગાથયામઃ ॥ ૩॥

સમુદ્રૈસ્સુમુદ્રૈર્વિમુદ્રૈર્નુતં તં
વિભાવપ્રભાવાનુભાવપ્રભાતમ્ ।
સુકાણ્ડં હરિં બ્રહ્મભાણ્ડે ભ્રમન્તં
જગન્નાથપુર્યાં વસન્તં નમામઃ ॥ ૪॥

અનાથૈકનાથં સુગાથૈકગાથં
સમસ્થવ્યવસ્થૈકપન્થાનમાદ્યમ્ ।
વિબાધપ્રબાધં સમુદ્રાદગાધં
સમુદ્રપ્રિયં તં મુદા સુસ્મરામઃ ॥ ૫॥

શ્રુતિસ્માર્તસિદ્ધં નિતાન્તપ્રસિદ્ધં
સમસ્તાર્થવત્સત્ત્વતત્ત્વાનુવિદ્ધમ્ ।
વિવૃદ્ધપ્રવૃદ્ધં સમૃદ્ધૈકસિદ્ધં
વિશુદ્ધં જગન્નાથમાચિન્તયામઃ ॥ ૬॥

વિભિન્નં હિ નિર્ભિન્નરૂપં વિભાન્તં
મહાન્તં હિમાંશ્વેકકાન્તં ભવાન્તમ્ ।
મહામેધિમેધાપ્રદં તં સ્વધાન્તં
હરિલ્લોકકાન્તં સમારાધયામઃ ॥ ૭॥

અખણ્ડં ચ તત્સચ્ચિદાનન્દરૂપં
અવાક્ચિત્તસઙ્ગોચરં ગોભરં તમ્ ।
સ્મરાન્તં સ્મરારામદં રામરૂપં
સદા તદ્ધિતં ભીકૃદન્તં સ્મરામઃ ॥ ૮॥

હરિરક્તાઽદ્ય મજ્જિહ્વા તુલસીપત્રસેવનાત્ ।
અતોઽષ્ટકં કરોમ્યેતજ્જગન્નાથગુણાનુગઃ ॥ ૯॥

ઇતિ શ્રી હિમાંશુ ગૌડવિરચિતં શ્રીજગન્નાથાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Prakash Ranganatha

---

*Shri Jagannatha Ashtakam*
pdf was typeset on May 24, 2026

Please send corrections to *sanskrit@cheerful.com*